## सिपि धातो रुर्वा । (७४/२४८७)

सिपि परतः सकारान्तस्य पदस्य धातोः रुः इत्ययमादेशो भवति, दकारो वा । अचकाः त्वम्, अचकात् त्वम् । अन्वशाः त्वम्, अन्वशात् त्वम् । धातुग्रहणं चोत्तरार्थं रुग्रहणं च ॥

## दश्च । (७५/२४६८)

दकारान्तस्य धातोः [1]पदस्य सिपि परतो रुः भवति, दकारो वा । अभिनः त्वम्, अभिनत् त्वम् । [2]अच्छिनः त्वम्, अच्छिनत् त्वम् ॥

## र्वोरुपधाया दीर्घ इकः । (७६/४३३)

रेफवकारान्तस्य धातोः [3]पदस्य उपधायाः इकः दीर्घो भवति । गीः । धूः । [4]पूः । आशीः । [5]वकारग्रहणमुत्तरार्थम् । [6]उपधाग्रहणं किम् ? अबिभर् भवान् । अभ्यासेकारस्य मा भूत् । इकः इति किम् ? [7]अत्रैव प्रत्युदाहरणे [8]भशब्दाकारस्य मा भूत् । धातोः इत्येव, अग्निः । वायुः । पदस्य इत्येव, गिरौ । गिरः ॥

## हलि च । (७७/३५४)

हलि च परतो रेफवकारान्तस्य धातोः उपधायाः इकः दीर्घः भवति । आस्तीर्णम् । विस्तीर्णम् । विशीर्णम् । अवगूर्णम् । वकारान्तस्य – दीव्यति । [9]सीव्यति । धातोः इत्येव, दिवम् इच्छति दिव्यति । चतुरः इच्छति चतुर्यति । इकः इत्येव, [10]स्मर्यते । [11]भव्यम् । अपदान्तार्थोऽयमारम्भः ॥

## उपधायां च । (७८/२२६७)

हलि इति अनुवर्तते । धातोः उपधाभूतौ यौ रेफवकारौ हल्परौ तयोः उपधायाः इको दीर्घो भवति हुर्च्छा – [12]हूर्च्छिता । मुर्च्छा – मूर्छिता । [13]उर्वी – ऊर्विता । धुर्वी – धूर्विता । हलि इत्येव, [14]चिरि, जिरि – चिरिणोति । जिरिणोति । इह कस्मान्न भवति, 'री गतौ' (धा. पा. १५०१) रिर्यतुः, रिर्युः, 'वी गत्यादिषु' (धा. पा. १०४९) विव्यतुः, विव्युः इति ? यणादेशस्य स्थानिवत्त्वात् असिद्धत्वाच्च बहिरङ्गलक्षणत्वेन हल्परौ रेफवकारौ न भवतः । [15]चतुर्यिता इत्यत्रापि बहिरङ्गलक्षणत्वात् अतो लोपस्य[16] (६.४.४८/२३०८) धातोः [17]उपधाभूतो रेफो न भवति । प्रतिदीव्ना [18]इत्यत्र तु 'हलि च' (८.२.७७/३५४) इति दीर्घत्वम्, दीर्घविधौ लोपाजादेशस्य स्थानिवद्[19]भावप्रतिषेधात् । 'असिद्धं बहिरङ्गमन्तरङ्गे' (व्या.प. ४२) इत्येतत् तु नाश्रयितव्यम् । 'उणादयोऽव्युत्पन्नानि प्रातिपदिकानि' (है. प. १०३) इति जिव्रिः, किर्योः, गिर्योः इत्येवमादिषु दीर्घो न भवति ॥

---

1. परस्य इत्यधिकम् ब. 2. उदाहरणमिदं नास्ति इ. 3. परतः इत्यधिकम् क. 4. पूः नास्ति ड. 5. वकारस्य ग्रहणम् इ, वग्रहणम् ह. 6. उपधायाः इति किम् इ. 7. अत्रैव दकारस्य मा भूत् ह. 8. भकाराकारस्य ड. 9. नास्ति इ. क. 10. स्वर्यते ह. 11. हव्यम् क. 12. हूर्च्छति क. 13. नास्ति क, तुर्वी, तूर्विता इत्यधिकम् ह. ड. ब. 14. चिरि जिरि नास्ति ह. 15. चतुर्यता ह. 16. असिद्धत्वात् इत्यधिकम् क. 17. उपधारेफो क. 18. इत्यत्रापि च क. 19. भावस्य ब.